# Ribhuproktam Sarvamatmaivanirupanam

# ઋભુપ્રોક્તં સર્વમાત્મૈવનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Sarvamatmaivanirupanam

File name : RRibhuproktaMsarvamAtmaivanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 18| 28-40||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં સર્વમાત્મૈવનિરૂપણમ્

(સર્વમાત્મૈવ કેવલમ્)

આત્મૈવેદમિદં સર્વમાત્મૈવાહં ન સંશયઃ ।
આત્મૈવાસ્મિ પરં સત્યમાત્મૈવ પરમં પદમ્ ॥ ૧૮.૨૮॥

આત્મૈવ જગદાકારં આત્મૈવ ભુવનત્રયમ્ ।
આત્મૈવ જગતાં શ્રેષ્ઠઃ આત્મૈવ હિ મનોમયઃ ॥ ૧૮.૨૯॥

આત્મૈવ જગતાં ત્રાતા આત્મૈવ ગુરુરાત્મનઃ ।
આત્મૈવ બહુધા ભાતિ આત્મૈવૈકં પરાત્મનઃ ॥ ૧૮.૩૦॥

આત્મૈવ પરમં બ્રહ્મ આત્મૈવાહં ન સંશયઃ ।
આત્મૈવ પરમં લોકં આત્મૈવ પરમાત્મનઃ ॥ ૧૮.૩૧॥

આત્મૈવ જીવરૂપાત્મા આત્મૈવેશ્વરવિગ્રહઃ ।
આત્મૈવ હરિરાનન્દઃ આત્મૈવ સ્વયમાત્મનઃ ॥ ૧૮.૩૨॥

આત્મૈવાનન્દસન્દોહ આત્મૈવેદં સદા સુખમ્ ।
આત્મૈવ નિત્યશુદ્ધાત્મા આત્મૈવ જગતઃ પરઃ ॥ ૧૮.૩૩॥

આત્મૈવ પઞ્ચભૂતાત્મા આત્મૈવ જ્યોતિરાત્મનઃ ।
આત્મૈવ સર્વદા નાન્યદાત્મૈવ પરમોઽવ્યયઃ ॥ ૧૮.૩૪॥

આત્મૈવ હ્યાત્મભાસાત્મા આત્મૈવ વિભુરવ્યયઃ ।
આત્મૈવ બ્રહ્મવિજ્ઞાનં આત્મૈવાહં ત્વમેવ હિ ॥ ૧૮.૩૫॥

આત્મૈવ પરમાનન્દ આત્મૈવાહં જગન્મયઃ ।
આત્મૈવાહં જગદ્ભાનં આત્મૈવાહં ન કિઞ્ચન ॥ ૧૮.૩૬॥

આત્મૈવ હ્યાત્મનઃ સ્નાનમાત્મૈવ હ્યાત્મનો જપઃ ।
આત્મૈવ હ્યાત્મનો મોદમાત્મૈવાત્મપ્રિયઃ સદા ॥ ૧૮.૩૭॥

આત્મૈવ હ્યાત્મનો નિત્યો હ્યાત્મૈવ ગુણભાસકઃ ।

આત્મૈવ તુર્યરૂપાત્મા આત્માતીતસ્તતઃ પરઃ ॥ ૧૮.૩૮॥

આત્મૈવ નિત્યપૂર્ણાત્મા આત્મૈવાહં ન સંશયઃ ।
આત્મૈવ ત્વમહં ચાત્મા સર્વમાત્મૈવ કેવલમ્ ॥ ૧૮.૩૯॥

નિત્યોઽહં નિત્યપૂર્ણોઽહં નિત્યોઽહં સર્વદા સદા ।
આત્મૈવાહં જગન્નાન્યદમૃતાત્મા પુરાતનઃ ॥ ૧૮.૪૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં સર્વમાત્મૈવનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૧૮। ૨૮-૪૦॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 18. 28-40..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

---

*Ribhuproktam Sarvamatmaivanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*